ज्योतुस्नाटकः ८ दशेन्धनः ९ दीपातिलकः १० दीपास्यः ११ नयनोत्सवः १२। इति शब्द-रत्नावली ॥ (यथा, मनौ। ४। २२९।
"वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः।
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥")
तदर्थं स्नेहादिनियमो यथा,—
"घृतं तैलञ्च दीपार्थे स्नेहान्यन्यानि वर्ज्जयेत्।"
इत्याद्ये वह्निपुराणे आह्निकतपोनामाध्यायः ॥
अन्यच्च।
"पुरश्चरणकृत्यञ्च दीपं शृणुष्व भैरव!।
दीपेन लोकान् जयति दीपस्तेजोमयः स्मृतः ॥
चतुर्व्वर्गप्रदो दीपस्तस्माद्दीपैर्यजेत् श्रिये ॥"
इत्युपक्रम्य,—
"घृतप्रदीपः प्रथमस्तिलतैलोद्भवस्ततः।
सार्षपः फलनिर्यासजातो वा राजिकोद्भवः ॥
दधिजश्चाब्जजश्चैव प्रदीपाः सप्त कीर्त्तिताः।
पद्मसूत्रभवा दर्भगर्भसूत्रभवाथवा ॥
शणजा वादरी वापि फलकोषोद्भवाथवा।
वर्त्तिका दीपकृत्येषु सदा पञ्चविधाः स्मृताः ॥*॥
तैजसं दारवं लौहं मार्त्तिक्यं नारिकेलजम्।
तृणध्वजोद्भवं वापि दीपपात्रं प्रशस्यते ॥*॥
दीपवृक्षाश्च कर्त्तव्यास्तैजसाद्यैश्च भैरव!।
वृक्षेषु दीपो दातव्यो न तु भूमौ कदाचन ॥
सर्व्वसहा वसुमती सहते न त्विदं द्वयम्।
अकार्य्यपादघातञ्च दीपतापं तथैव च ॥
तस्माद्यथा तु पृथिवी तापं नाप्नोति वै तथा।
दीपं दद्यान्महादेव्यै अन्येभ्योऽपि च भैरव! ॥
कुर्व्वन्तं पृथिवीतापं यो दीपमुत्सृजेन्नरः।
स तावत्तापं नरकमाप्नोत्येव शतं समाः ॥
सुदृढवर्त्तिसस्नेहपात्रेऽभग्ने सुदर्शने।
कृष्णाये वृषकोटौ तु दीपं दद्यात् प्रयत्नतः ॥
लभ्यते यस्य तापस्तु दीपस्य चतुरङ्गुलात्।
न स दीप इति ख्यातो ह्योघवह्निस्तु स स्मृतः ॥
नेत्राह्लादकरः स्वर्च्चिर्दूरतापविवर्ज्जितः।
सुशिखः शब्दरहितो निर्धूमो नातिह्रस्वकः ॥
दक्षिणावर्त्तवर्त्तिस्तु प्रदीपः श्रीविवृद्धये।
दीपवृक्षस्थिते पात्रे शुद्धस्नेहप्रपूरिते ॥
दक्षिणावर्त्तवर्त्त्या तु चारुदीप्तः प्रदीपकः।
उत्तमः प्रोच्यते पुत्र! सर्व्वतुष्टिप्रदायकः ॥
एतैश्च वर्ज्जितो दीपो मध्यमः परिकीर्त्तितः।
विहीनः पात्रतैलाभ्यामधमः परिकीर्त्तितः ॥
शाणं वा बादरं वाक्षं जीर्णं मलिनमेव वा।
उपयुक्तन्तु नो दद्यात् वर्त्तिकार्थन्तु साधकः ॥
उपादद्यान्नूतनमेव सततं श्रीविवृद्धये ॥ * ॥
कौषजं रोमजं वस्त्रं वर्त्तिकार्थं न चाददेत्।
न मिश्रीकृत्य दद्यात्तु दीपं स्नेहान् घृतादिकान् ॥
कृत्वा मिश्रीकृतं स्नेहं तामिस्रं नरकं व्रजेत्।
वसामज्जास्थिनिर्यासैः स्नेहैः प्राण्यङ्गसम्भवैः ॥
प्रदीपं नैव कुर्य्यात्तु कृत्वा पङ्के विषीदति।
अस्थिपात्रेऽथवा गर्ये दुर्गन्धाद्युपवासिनि ॥
नैव दीपः प्रदातव्यो विबुधैः श्रीविवृद्धये।
नैव निर्व्वापयेद्दीपं कदाचिदपि यत्नतः ॥
सततं लक्षणोपेतं देवार्थमुपकल्पितम्।
न हरेदज्ञानतो दीपं तथा कोपादिना नरः ॥
दीपहर्त्ता भवेदन्धः काणो निर्व्वापको भवेत्।
उद्दीप्तदीपप्रतिमः काष्ठकाञ्चनसम्भवः ॥
विल्वेभोद्भवमेवाथ दीपाभावे निवेदयेत्।
उल्मुकं नैव दीपार्थे कदाचिदपि चोत्सृजेत् ॥
प्रसन्नार्थन्तु तं दद्यादुपचाराद्बहिःकृतम्।
एवं वां कथितो दीपो धूपश्च श्रुतं सुतौ ॥"
इति कालिकापुराणे ६८ अध्यायः ॥
श्राद्धे मलवर्त्तियुक्तदीपनिषेधो यथा,—
"दीपं वर्जेत् वस्त्रवर्त्त्या प्रशस्तं तैलमेव च।"
इति योगिनीतन्त्रे प्रथमतमे २ भागे ५ पटलः ॥
कार्त्तिकमासे दीपदानस्य माहात्म्यं यथा,—
"शृणु दीपस्य माहात्म्यं कार्त्तिके प्र हरि-प्रिय!।
यस्य श्रवणमात्रेण दीपदाने मतिर्भवेत् ॥
सूर्य्यग्रहे कुरुक्षेत्रे नर्म्मदायां शशिग्रहे।
तुलादानस्य यत् पुण्यं तदूर्ध्वं दीपदानतः ॥
घृतेन दीपकं यस्तु तिलतैलेन वा पुनः।
ज्वालयेन्मुनिशार्दूल! अश्वमेधेन तस्य किम् ॥
तेनेष्टं क्रतुभिः सर्व्वं कृतं तीर्थावगाहनम्।
दीपदानं कृतं येन कार्त्तिके केशवाग्रतः ॥
तावद्गर्ज्जन्ति पापानि देहेऽस्मिन् मुनि-सत्तम!।
यावत् कार्त्तिकमासेन दीपदानं कृतं भवेत् ॥
तावद्गर्ज्जन्ति पुण्यानि स्वर्गे मर्त्ये रसातले।
यावत्तु ज्वलते दीपः कार्त्तिके केशवाग्रतः ॥
श्रूयतेऽत्रापि पितृभिर्गाथा गीता महामुने!।
भविष्यन्ति कुलेऽस्माकं कदाचित्ते सुता भुवि ॥
कार्त्तिके दीपदानैर्ये तोषयिष्यन्ति केशवम्।
अपि नस्तु भविष्यन्ति कुले सुचरिता सुखैः।
दीपदानं कार्त्तिके ये दास्यन्ति हरितुष्टिदम् ॥
गयायां पिण्डदानेन कृतं न प्रीणनं सुतैः।
येनापि कार्त्तिके दत्तो दीपस्तुष्टिकरो हरेः ॥
दीपं दास्यन्ति ये पुत्रास्तुष्ट्यर्थं चक्रपाणिनः।
कार्त्तिके तैर्मुनिश्रेष्ठ! नरकादुद्धृता वयम् ॥
मन्त्रहीनं क्रियाहीनं शुद्धिहीनं जनार्द्दन!।
व्रतं संपूर्णतां यातु कार्त्तिके दीपदानतः ॥
अनेनैव हि मन्त्रेण दीपं संकल्पयेन्मुने!।
मधुसूदनतुष्ट्यर्थं कार्त्तिके मुनिपुङ्गवः ॥"
इति पाद्मे उत्तरखण्डः ॥
अपि च।
"दास्यति देवदेवाय दीपपुष्पानुलेपनम्।
अपि नः स कुले भूयादेकादश्यां तिथौ नरः ॥
करिष्यत्युपवासन्तु सर्व्वपातकहानिदम्।
इत्थं पितॄणां वचनं श्रुत्वा भूपतिसत्तमः ॥
ददौ च दीपान् विधिवत् विष्णोरायतने द्विज!।
सुगन्धतैलसंपूर्णान् दीपान् सघृततैलकान् ॥
सर्षपस्य सुतैलेन मधुकातसिसम्भवैः।
दीपप्रदानान्नरकानन्धतामिस्रसंज्ञकान्।
तीर्त्वा सभार्य्यया ब्रह्मन्! विष्णुलोकमगात्ततः ॥"
इति वामनपुराणम् ॥
दीपं स्पृष्ट्वा वैधकर्म्मकरणे दोषो यथा,—
"दीपं स्पृष्ट्वा तु यो देवि! मम कर्म्माणि कारयेत्।
तस्यापराधात् भूमे! पापं प्राप्नोति मानवः।
तच्छृणुष्व महाभागे! कथ्यमानं मयानघे! ॥
जायते षष्टिवर्षाणि कुष्ठी गात्रपरिप्लुतः।
चाण्डालस्य गृहे तत्र एवमेव न संशयः ॥
एवं भूत्वा तु तत् कर्म्म मम क्षेत्रे स्थितो यदि।
मद्भक्तश्चैव जायेत शुद्धे भागवते गृहे ॥
प्रायश्चित्तं प्रवक्ष्यामि दीपस्य स्पर्शनाद्भुवि।
तरन्ति मनुजा येन कष्टं चाण्डालयोनिषु ॥
यस्य कस्यापि मासस्य शुक्लपक्षे च द्वादशी।
चतुर्थभक्तमाहारमाकाशशयने स्वपेत् ॥
दीपं दत्त्वापराधाद्धि तरन्ति मनुजा भुवि।
शुचिर्भूत्वा यथान्यायं मम कर्म्म पथे स्थितः ॥
एतत्ते कथितं देवि! स्पर्शनात् दीपकस्य तु।
संसारशोधनञ्चैव यत् कृत्वा लभते शुभम् ॥"
इति वराहपुराणम् ॥ * ॥
पुरुषस्य दीपनिर्व्वापणे दोषो यथा,—
"दीपनिर्व्वापणात् पुंसः कुष्माण्डच्छेदनात् स्त्रियः।
अचिरेणैव कालेन वंशनाशो भवेद्ध्रुवम् ॥*॥
देवार्थकल्पितदीपस्य निर्व्वापणे दोषो यथा,—
नैव निर्व्वापयेद्दीपं देवार्थमुपकल्पितम्।
दीपहर्त्ता भवेदन्धः काणो निर्व्वापको भवेत् ॥"
इत्येकादशीतत्त्वे कालिकापुराणम् ॥
कार्त्तिककृष्णचतुर्द्दश्यां नरकनिवृत्तये दीपदानं यथा,—
"नरकाय प्रदातव्यो दीपः संपूज्य देवताः।"
इति तिथितत्त्वधृतलिङ्गपुराणम ॥ * ॥
पृथिव्यां दीपो न संस्थाप्यः। यथा,—
"सर्व्वसहा वसुमती सहते न त्विदं द्वयम्।
अकार्य्यपादघातञ्च दीपतापस्तथैव च ॥"
इत्येकादशीतत्त्वधृतकालिकापुराणम् ॥

दीपकं, क्ली, (दीपयतीति। दीप् + णिच् + ण्वुल्।) वाक्यालङ्कारः। दीप्तिकारके, त्रि। इति मेदिनी। के, १०४ ॥ कुङ्कुमम्। इति शब्दरत्नावली ॥*॥
वाक्यालङ्कारस्य लक्षणं यथा,—
"पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत्।
एकधर्म्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥
अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥
यथा, माघे.
बलावलेपादधुनापि पूर्व्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा।
सती च योषित् प्रकृतिश्च निश्चला
पुमांसमभ्येति भवान्तरेष्वपि ॥"
इति साहित्यदर्पणे ।१०।६७॥
अपि च काव्यचन्द्रिकायाम्।
"जातिक्रियागुणद्रव्यवाचकेन पदेन तु।
एकत्र वर्त्तिना सर्व्ववाक्यार्थो दीपकम्भवेत् ॥"
यथा,—
"लसद्भ्रमरझङ्कारपुंस्कोकिलकलध्वनिः।
मन्दमन्दगवातोऽपि हरन्ति हृदयं नृणाम् ॥